# संस्कृतमहोत्सवः

संकृतभाषा विश्वस्य प्राचीनतमा भाषास्ति तथा च अधुनापि प्रचलितास्ति | प्रायः सर्वेषां प्राचीनशास्त्राणां मूलभाषा संस्कृतमेव अस्ति तत्र आयुर्वेदस्यापि समावेशः भवति | आयुर्वेदे स्नातकपदवी कृते संस्कृतस्य ज्ञानमावश्यकमस्ति | साम्प्रतकाले संस्कृतस्य न्यूनोपयोगेन विश्वस्मिन् संस्कृतज्ञापकाः बह्वल्पकाः सन्ति | संस्कृतभाषायाः अल्पोपयोगः समाजाय लोकाय च हानीप्रदं वर्तते | कारणं यत् संस्कृतभाषायाः लुप्तत्वे सति प्राचीनसंस्काराः प्राचीनपरंपरा च विलुप्ता भविष्यन्ति, तथा च उक्तं कारणद्वयं भारतस्य चायुर्वेदस्य अभिन्नाङ्गरूपेण विराजमानं वर्तते |

तदेव भावनायाः विचारं कृत्वा प्रतिवर्षं संस्कृतसंस्कृतिसंस्काररक्षणाय कृतनिश्चयाः “स्वामिनारायण विश्वविद्यालयस्य” अध्यक्षाः शास्त्रीस्वामिश्रीप्रेमस्वरुपदासजी, उपध्यक्षौ श्रीस्वामिभक्तवत्सलदासजी तथा च श्रीस्वामिभक्तिनंदनदासजी चरणानां प्रेरणया तथा च विश्वविद्यालयस्य कुलपतिः वैद्यश्रीधरः राव, कुलसचिव डो. श्रीअजित गंगावणे महोदयानां पूर्णसहयोगेन “सर्वेषां कृते संस्कृतं” इति विषयं अवलंब्य संस्कृतसप्ताहस्य आयोजनं भवेदिति | किन्तु “संस्कृतसप्ताहे” विश्वविद्यालयस्य सर्वे छात्राः शिक्षकाः च सहर्षं भागं गृहीतवन्तः ।

## संस्कृतमहोत्सवान्तर्गतकृतं कार्यक्रमम्

विश्वविद्यालयस्य आदेशानुसारं तथा च विद्यालयस्य प्रधानाचार्यैः यथा निर्दिष्टं तद्वत् अस्मत् विभागेन आयोजितस्य कार्यक्रमस्य विवरणम् ।

## प्रथमदिवसः - उद्घाटनसमारोहः / नाटकस्पर्धा

संस्कृतमहोत्सवस्य प्रथमदिवसे संस्कृतमहोत्सवकार्यक्रमस्य यथा सूचना प्रदत्ता तथा सर्वमहाविद्यालयस्य सर्ववर्षीयछात्रान् सर्वशिक्षकगणान् एकीकृत्य विद्यालस्य प्रधानाचार्यस्य समुपस्थितौ “संस्कृतसप्ताहसमारोहस्य” उद्घाटनमभवत् | एवञ्च सर्वमहाविद्यालयस्य सर्ववर्षीयछात्रान् सर्वशिक्षकगणान् एकीकृत्य “श्रीमहाभारते स्त्रीचरित्रम्” एवं श्रीरामशबरीमिलनम् इति विषये नाटकस्पर्धायाः आयोजनं कृतमासीत् | तत्र उभयोः प्रतिस्पर्धाथिनः प्रथमं क्रमाङ्कं प्राप्तवन्तः ।

## द्वितीयदिवसः – श्लोककण्ठपाठस्पर्धा

संस्कृतमहोत्सवस्य द्वितीयदिवसे श्लोककण्ठपाठस्पर्धायाः आयोजनं कृतं आसीत् | तत्र चक्रद्वयं आसीत् तत्र प्रथम चक्रे ये छात्राः श्रीमद्भगवत्गीतायाः १४ चतुर्थदशाध्ययस्य कण्ठस्थीकरणं आवश्यकं वर्तते । ते एव छात्राः द्वितीये चक्रे प्रवेशप्राप्तुं शक्यते । श्लोककण्ठपाठस्पर्धा (द्वितीयं चरणं) अग्रे श्लोककण्ठपाठस्पर्धायाः द्वितीयचरणस्य आयोजनमभवत् | तत्र ये छात्राः श्रीमद्भगवत्गीतायाः १४ चतुर्थदशाध्ययः कण्ठस्थं अवदन्, ते छात्राः द्वितीये चक्रे प्रवेशं संप्राप्य तेषां स्पर्धा अभवत् । द्वितीये

चक्रे छात्राः आयुर्वेदस्य, मन्त्राणां एवं श्रीमद्भगवत्गीतायाः १४ चतुर्थदशाध्ययं विहाय यं कं अपि श्लोकं वक्तुं शक्यते। तत्र आयुर्वेद महाविद्यालयस्य तृतीय वर्षे पठती छात्रा "वैदेही केतनभाई पटेल" प्रथमं क्रमाङ्कं प्राप्तवती।

### तृतीयदिवसः – समापनकार्यक्रमः

संस्कृतमहोत्सवस्य तृतीयदिवसे "संस्कृतमहोत्सव समापनकर्याक्रमं" आयोजितं आसीत् | "स्वामिनारायण विश्वविद्यालयस्य" अध्यक्षाः शास्त्रीस्वामिश्रीप्रेमस्वरुपदासजी, उपध्यक्षौ श्रीस्वामिभक्तवत्सलदासजी तथा च श्रीस्वामिभक्तिनंदनदासजी चरणाः समुपस्थिताः आसन्। तथा च "स्वामिनारायण विश्वविद्यालयस्य" कुलपतिः वैद्यश्रीधरः राव, कुलसचिव डो. श्रीअजित गंगावणे महोदयानां अपि विशेषासमुपस्थितिः आसीत् । सर्वमहाविद्यालयस्य प्रधानाचार्याणां, शिक्षकाणां छात्राणाञ्च सपुपस्थितिः आसीत् । संस्कृतसहितासिद्धान्तविभागस्य संयोजकेन अयं कार्यक्रमः अभवत्। विविधस्पर्धासु प्राप्तविजयछात्रान् प्रमाणपत्रेण उपहारेण च संमानं च कृत्वा विश्वस्य "शं" भवतु इति प्रार्थनां च कृत्वा कर्याक्रमस्य समाप्तिं कारितम् |